नाडिदोष विधानम्-

आवयोः अष्टकूटानां मध्ये एकनाडि दोषस्य यत् सूचीतं सर्वारिष्ट विनाशपूर्वकं दीर्घायुःपुत्रपौत्रादि प्राप्तिद्वारा ऐहिकामुष्मिक सकलकल्मषोपनोदनार्थं एकनाडिदोषापनुत्तये एकनाडिदोष शांत्याख्यं कर्म करिष्ये.... तदङ्गत्वेन गणपति पूजनं पुण्याहवाचनं (मातृकापूजनं वैश्वदेवसंकल्पायुष्मंत्रजपं नान्दीश्राद्धं) ब्रह्माचार्यादि वरणं करिष्ये...( अयम् दोषस्यशांतिः विवाहपश्चात् कर्तव्यमिति व्यवहारः)

विषयेस्मिन् यजमानस्य मृतपितृनुद्दिश्य नान्दीश्राद्धकरणार्थं( परसस्परं संयोगेन स्त्रीपुरुषप्रकृतिविरोधत्वात्)

गणपतिपूजनादारभ्य वरणान्त कर्माणि समाप्य, दिग्रक्षणादि भूमिपूजनान्तं कृत्वा.संस्कारितस्थंडिले वरदनामाग्निं संस्थाप्य, मातृकास्थापनोत्तरतः माषैरष्टदलं विरच्य मध्ये चाष्टदलेषु शेषादिनवनागान् संस्थाप्य लाभोपचारेः संपूज्य, मध्ये रचिते सर्वतोभद्रे कलशत्रयं वामान्ताः पूर्णपात्रान्तविधिना संस्थाप्य,

प्रथम दक्षिणकलशे ॐजोगे योगे० इति योगिनीं मध्यकलशे आद्य( चन्द्रः) मध्य( अग्निः) अन्त्य( सूर्यः)नाडिनां साभवितदोषानुसारेण पूगीफले ॐआप्यायस्व० ॐ अग्नेनय० ॐ उदुत्यं० इति स्वस्वदेवता मंत्रेणावाह्य अन्यपूगीफले नक्षत्राधिपतिदैवतं स्वस्वमन्त्रेणसंस्थाप्य, उत्तर कलशे- ॐअघोरेभ्योऽथ० इति संहारभैरवञ्चावाह्य, जज्जाग्रत इति शिवसंकल्पसूक्त,ॠचंव्वाचमितिशान्त्यध्याय मंत्रैः षोडशोपचारैः संपूज्य, ग्रहमण्डले आदित्यादि अनन्तान्तमण्डलदेवताः संस्थाप्यचसंपूज्य,ऐशाने रुद्रकलशं पूर्णपात्रान्तं संस्थाप्य तस्मिन् वरुणंचतीर्थानावाह्य, गंधादिभिरर्चयित्वा ॐअसंख्याता सहस्राणि० इति रुद्रं कलशाम्भसि सम्पूज्य षडङ्गरुद्र जपः

ब्रह्मासनादि आधारावाज्यभागान्तम्, वराहुतिः,ग्रहहोमः, प्रधान नाडि( चन्द्रमसं अग्निं वा सूर्यम्) १००० वारं मध्वाज्य, तिल, चरु, कुशसमिद्ध, चतुर्द्रव्यैः प्रत्येकं प्रतिद्रव्येण, नक्षत्राधिपतिं तैरैवद्रव्यैः प्रत्येकं प्रतिद्रव्येण१०८ वारं, योगिनीभैरवदैवते प्रतिद्रव्येण १०८ वारम्, नवनागान् नाममन्त्रेण २८ वारं कृष्णतिलाज्येन, गुग्गलहोमः, सर्षपहोमः,लक्ष्मीहोमः व्याहृतिहोमः१०८ वारम्, उत्तरपूजनान्ते हुतशेषेण स्रुचं पुरयित्वा हस्ताभ्यां अग्निंस्विष्टकृतम्,नवाहुतयः, बलिदानम्, पूर्णाहुतिर्वसोर्धाराश्च,संस्रव प्राशनम्, अग्नौपवित्रेप्राश्य,प्रणिताविमोकः,अग्निंसम्पूज्य, भस्म धारणम्, रुद्रकलश सहित प्रधानकलशानां उदकेन यजमानमूर्ध्नि अभिषेकः,आज्यावलोकनम्, दक्षिणादानसंकल्पः,( गावो अन्नं वसनं सर्व दोषाऽपहारकम्) आचार्याय सुप्रतिष्ठसुवर्णनागदानम्, देवताग्निविसर्जनम्,

यजमानः भो ब्राह्मणाः अनेन एकनाडिदोष विधानेन सकलदोषोपशनमनोऽस्तु? सकल दोषोपशमनोऽस्तु? सकलदोषोपशमनोऽस्तु? इति वारत्रयं पृच्छेत्, ब्राह्मणाः त्रिर्वारम्- अस्तु सकलदोषोपशमनःॐस्वस्ति.इति त्रिर्वारं निर्भयाशीषं दध्युः,